ग्रं. ३३५

मन्त्रचन्द्रिका

मं. च. का. श्रीगणेशायनमः आरक्ताभंत्रिनेत्रंपृथुतरजठरंवेदहस्तान्दधानंविभ्राणंमौलिदेशेहिमकरसकलंदानधारस्नकुंभम् शैलेन्द्रार्घेस
१ मेतेरमणपरिष्टंकैः सेवितंप्रभ्रदन्नंभोगीन्द्राबद्धसत्रंसकलशुभकरंतंभजेहंगजास्यम् ॥१॥ उदितादिवाकरदेहंउरुरूरवामाङ्कस्तगेहं
श्रीस्फुरितभक्तेतंसत्स्नेहंशैलजांवन्देहं ॥२॥ पीयूषांशुकलामनोज्ञमुकुटं ईषत्फालतुल्यालकांभालश्रीविजितास्मीशङ्खाधरांनीलारविन्देक्ष
णाम् चापंबाणगुणांकुशान्दधतींसर्वाङ्गतोवाकूभिः श्रयंगंसुमनोरमामरुणभांवन्देगिरीन्द्रात्मजाम् ॥३॥ कालिन्दीकलकूलकेलिकलना
पं नन्दकुलैःसंततंसंवीक्षितअरन्दकैर्मुनिवरैर्गीतंगुणैःकालनुपम् लीलाताडितविश्वविश्वभयदश्रेयासपानीककंसस्मरारेःकमलाङ्गमस्मरतिचिरंकंद
मुकुन्दंभजे ॥४॥ मुरलीरवरंजितविश्वजनस्तुभाविजितेनतमनमधनः चलद्दक्षपलानिचयेनहतस्तनुतांममशर्मसुकंदहितैः ॥५॥ फुल्लांतिवा
रिजमनाग्विहरंतिकोकाःकामंचरन्तिविहगाःसकलासुदिक्षु शिष्याःपठंतिचभवंतिथभानिलोकेयस्योदयेतमहमकरविंनमामि ॥६॥ कः
पंगुस्तारथिरथोरथमेकचक्रमारुह्यनक्रविनियोज्यवसप्तमस्वान् लोकत्रयेप्यततिचित्रकरिचकारीभानुःसभानुभिरहोममपातुदेहम् ॥७॥ योयो
गिनामपिमनस्वपलीचकारशुभ्रांगमिर्यमथयातिस्म यवीयसोपः नंमंक्षुनेत्रशिखिनाज्ञामयांचकारमारंहरन्तमहमाशुनमामिभक्त्या ८
हितिं २ चन्द्रत्वचरणताडितलंकुपर्वापरोच्छलज्जलस्मृतांवरंभ्रमितभीमनेत्रत्रयं जटापटलभेदितोपरिचरांबुजंधूर्जटेस्तनोतुपदुताण्डवंमम
नवंनवंमंगलं ९ आशीर्गामशास्त्रकौरवसनेःस्तत्वंत्रनःसज्जनवृहानंदकरःकलानिधिकलाभालङ्कीयाकिंकरः नानाशास्त्रविचा
रचारुकवितासंदोहविज्ञाखिलज्ञातलोमपरिहेनोलुभवः श्रीश्रीनिवासःकृती १० आशीर्दृशोयनरपालविशालभालजालस्रमाश्रितम रामः
नोरमयत्ययोजः सर्वागमांबुनिधिमंथनमन्दराद्रिः श्रीश्रीनिवासतनयस्सजगन्निवासः ११ तन्नन्दनाःसुकृतिनःकरुणार्द्रचित्ताःशीले १

ड्ज्ञा वराणपंकजचंचरीकाः ज्येष्ठः शिरोमणिरिति प्रथितः कनिष्ठस्तस्माज्जनार्दन इति सुतनुचक्रपाणिः ॥१२॥ जनार्दनाभिधस्तेषु यथामति
कृष्णलात्तं त्रिकात्मजबोधाय कुरुते मंत्रचन्द्रिकाम् ॥१३॥ मंत्राणि यानि हि शिवार्चनचंद्रिकायां श्रीश्रीनिवासकृतिनाप्रकटीकृतानि सर्वा
णितानि सुनिचिन्त्य तु कृष्णपुत्रकाम्यधिकल भयेन च दर्शितमधुना ॥१४॥ आदौ गणपतेर्मंत्राः शिवायास्तदनन्तरम् ततः सूर्यस्य तदनु स्कंदस्य शंभो
र्योक्ता यथाक्रमम् ॥१५॥ अथ क्रमेण गणेशादीनां तत्तन्मंत्रा मंत्रभेदाश्च लिख्यंते अथ गणेशमंत्राः तत्र दशवर्णात्मको गणेशमंत्रः गं इति
गणेशमंत्रेण प्राणायामं च कृत्वा शिरसि ॐ गणकाय ऋषये नमः मुखे निचृद्छंदसे नमः हृदये ॐ विघ्नेश्वराय देवतायै नमः गुह्ये ग्लं बीजाय० पा
दयोः मायाव्यक्तये० पुनर्गुह्ये परमात्मबीजाय० पादयोः वृक्षिशक्त्यै पुनर्गुह्ये उद्दीयबीजाय० पादयोः कुंडलीशक्त्यै० पुनर्गुह्ये गकारबीजाय० तत्रैव
बिंदुशक्त्यै० नाभौ नादकीलकाय नमः इति विन्यस्य मम सर्वाभीष्टसिद्ध्यर्थे विनियोगः इति कृतांजलिरुक्त्वा मूलेन करशुद्धिं कृत्वा अंगुष्ठयोः
ॐ गणंजयाय स्वाहा हृदयाय नमः तर्जन्योः एकदंष्ट्राय हुं फट् शिरसे स्वाहा मध्यमयोः अचलकर्णिने नमः शिखायै वषट् अनामिकयोः
गजवक्त्राय नमो नमः कवचाय हुं कनिष्ठिकयोः लंबोदराय चंडाय हुं फट् अस्त्राय फट् इति मंत्रानंगुष्ठादिक निष्ठान्तं करयोर्विन्यस्य नेत्रवर्जं
हृदयादिषु पंचांगेषु विन्यसेत् अथवा गां गीं गूं गैं गौं गः इति षड्दीर्घभाजा बीजेनैव करषडंगन्यासं कुर्यात् अथ ध्यानं रक्तो रक्तांगरागांशुककु
सुमयुतस्तुंदिलश्चन्द्रमौलिर्नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरं प्रतनाग्रः हस्ताग्रात्तपाशांकुशरदवरदो नागवक्त्रोहिभूषो देवः पद्मा
सनो वो भवतु नतसुरो भूतये विघ्नराजः वामाद्यूर्ध्वयोरद्युत दाग्रधःस्थयोः स्वैरस्त्रायुधध्यानं इति ध्यानं विधाय यथाशक्ति जपं कृत्वा तदनु
गरुडनः षडंगं विधाय गुह्यातिगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थिते इति करस्थोदकेन समर्प्य प्रणमेत्

ह्येकाक्षरगणेशः षडंगध्यानविधिः अस्यैव मंत्रस्यान्ये षड्भेदाः गं गः गौं गः ग्लौं गोः एते कु ग्लौं गौं इति बीजद्वयस्य गणको मुनिर्निचृत्स्यान्नि
च्छन्दस्य देवता बालो गणपतिः सर्वसुरासुरनमस्कृतः स्वेन षड्दीर्घयुक्तेन षडंगानि प्रकल्पयेत् अन्नाद्येन्ना ग्लौ मित्यादि द्वितीये गां गीं भित्वा
दिकरषडंगन्यासो ज्ञेयः ध्यानपूजाजपाद्यस्याद्स्य पूर्ववदेव तु एवं संभूय पञ्चैवैकाक्षरो मंत्रः सप्तविधः अथ हरिद्रागणेशमंत्रः वसुविंशत्य
क्षरात्मकः ह्रीं विरिविरि गणपति वरवरद सर्वलोकं मे वशमानय स्वाहा इति मन्त्रेणाग्रगण्यामन्त्र्ययं कृत्वा शिरसि गणकाय ऋषये नमः
मुखे गायत्रीछन्दसे नमः हृदि विरिविरि गणपतये देवतायै इति विन्यस्येष्टसिद्धये विनियोग इति कृताञ्जलिरित्वा ह्रीं विरि हृदयाय नमः ह्रीं
गणपति शिरसे स्वाहा ह्रीं वरवरद शिखायै वषट् ह्रीं सर्वलोकं मे कवचाय हुं ह्रीं वशमानय नेत्राय वौषट् ह्रीं स्वाहा अस्त्राय फट् इति षड
गमंत्रानङ्गुष्ठादिकरतलान्तं विन्यस्य हृदयादिष्वपि विन्यसेत् अथ ध्यानम् सिन्दूराभमिभाननं त्रिनयनं हस्ते च पाशांकुशौ बिभ्राणं मधु
मत्कपालमनिशं साध्वेन्दुमौलिं भजे पुष्ट्याश्लिष्टतनुं ध्वजाग्रकरया पद्मोल्लसद्धस्तया तद्योन्याहितपाणिमात्तवसुमत्पात्रोल्लसत्पुष्करम्
वामोर्ध्वकरमारभ्य दक्षाधःकरपर्यन्तं पाशादित्रयं वामाधःकरे देव्याया ई वामाङ्कनिविष्टाया देव्या दक्षिणकरे ध्वजाग्रं स्वांत्या वामह
स्तयोः पद्मं इत्यायुधध्यानं पुष्करं शुण्डाग्रः एवं ध्यात्वा यथाशक्ति जपं विधाय जपानन्तरं पुनः षडंगं कृत्वा गुह्यातिगुह्येति पूर्वो
क्तमन्त्रेण जपं समर्प्य प्रणमेत् केचित्तु मंत्रमेनमेकोनविंशत्यक्षरात्मकं वदन्ति तन्मते वा वरवरेति पंचवर्णाः लोकमिति वर्णद्वयमि
ति सप्त वर्णा न भवन्ति अस्यापि मन्त्रस्य षडंगध्यानादिकं पूर्वमन्त्रवदेव मायाद्यपूर्वोक्तमन्त्रस्यैवमन्त्रान्तरत्वेनोक्तत्वात् तस्य ध्याने विशेषः रामः
बीजापूरगदेक्षुशरासनमरीमालांच वामैः करैः हस्तैकेल्पनपाशमार्गणादानत्वाङ्कुमन्धत् सिंदूरारुणविग्रह त्रिनयनो योन्याक्तपुंडाग २

णालिङ्गिताङ्गीकृतपाणिपद्मनकरां पुष्टिर्वहन्वोऽवतात् अत्र वामाधःकरादिदक्षाधःकरांतं चायुधध्यानं कुंभस्य सर्वेष्विति केचिदुक्तत्वात् इति
ध्यानं षडंगादिकं तु पूर्ववदत्रवत् इति विघ्नगणपतेस्त्रयो मंत्राः अथ लक्ष्मीगणेशः श्रीं गं सौम्याय महागणपतये वरवरद सर्वजनं मे
वशमानय स्वाहा इत्येकोनत्रिंशदक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि अन्तर्यामिने ऋषये नमः मुखे निचृद्गायत्रीछन्दसे० हृदये
श्रीलक्ष्मीगणेशाय देवतायै इति विन्यस्य ॐ श्रां गां हृदयाय नमः ॐ श्रीं गीं शिरसे स्वाहा ॐ श्रूं गूं शिखायै वषट् ॐ श्रैं गैं कवचाय हुं
ॐ श्रौं गौं नेत्राय वौषट् ॐ श्रः गः अस्त्राय फट् इति करषडंगन्यासं विधाय ध्यानं कुर्यात् यथा हेमाभः पीतवस्त्रः करतलक
मलैः संदधच्चक्रशंखौ दंताभिनीचनोसाभ्रकनकघटः पद्मसंस्थस्त्रिनेत्रः वामांकाविष्टलक्ष्म्या विधृतकमलया श्रोत्र स
दृक्षदोर्भ्यामाश्लिष्टः सौवर्णकान्त्या गणप इह महाश्रीकरो वः श्रियेस्तु दक्षिणोर्ध्वकरमारभ्य दक्षिणाधःकरपर्यंतमायुधध्या
नम् नासाशुंडादराः इति ध्यात्वा जपं कृत्वा समर्पणमेव इति लक्ष्मीगणेशमंत्रः अथ त्र्यक्षरः शक्तिगणपः ह्रीं
ग्रीं ह्रीं इति मंत्रेण प्राणायामत्रयं कृत्वा शिरसि ॐ भार्गवाय ऋषये० मुखे विराट्छंदसे० हृदये ॐ शक्तिगणपतये देवता
यै० इति विन्यस्य गां गीमित्यादि करषडंगन्यासं विधाय ध्यायेत् यथा गजेंद्रवदनं साक्षाच्चलत्कर्णसुचामरम् हेमवर्णं च
तुर्बाहुं पाशांकुशधरं विभुम् स्वरलं दक्षिणे हस्ते बीजपूरं च वामके पुष्करे मोदकं चैव धारयंतमनुस्मरेत् वामोर्ध्वकरमारभ्य

मं॰ वं ३ वामाधःकरपर्यन्तंमायुधध्यानम् इतिध्यात्वाजपंकृत्वासमर्प्यप्रणमेदिति त्र्यक्षरःशक्तिगणपः अथचतुरक्षरःशक्तिगण
पतिमंत्रः ॐ ह्रीं ग्रीं ह्रीं इतिमंत्रेणप्राणायामत्रयंकृत्वा शिरसिॐभृगुऋषयेनमः मुखेॐगायत्रीछन्दसेनमः हृदये
ॐशक्तिगणपतयेदेवतायैनमः इतिविन्यस्यगांगीमित्यादिनाकरषडंगन्यासंकृत्वाध्यानंकुर्यात् यथा हेमाभंहेमव
र्णंहृदरनहचारुबाहुंत्रिनेत्रंदोर्भिःपाशाक्षसूत्रेनिजरदनसृणीमोदकंपुष्करेण विभ्राणंहेमभूषंतरुणतरणिरुक
चारुसन्ध्यासमेतंविघ्नेशंविश्ववंद्यंत्रिभुवनशरणंचिंतयेच्छ्रीगणेशं दक्षोर्ध्वकरमारभ्यवामोर्ध्वकरपर्यंतमायुधध्या
नम् इतिध्यात्वाजपंकृत्वासमर्प्यप्रणमेतत् इतिचतुरक्षरःशक्तिगणपतिः। इतिदशाक्षरंविप्रसादनमंत्रः गंक्षि
प्रप्रसादनायनमः इतिमंत्रेणप्राणायामत्रयंकृत्वा शिरसिॐगणकायऋषयेनमः मुखेॐविराट्छंदसेनमः
हृदयेॐक्षिप्रप्रसादनायगणपतयेदेवतायैनमः इतिविन्यस्यगांगीमित्यादिनाकरषडंगन्यासंविधायध्यायेत् यथा गणः
पाशांकुशौकल्पलतांविषाणंदधत्स्वशुंडाहितबीजपूरः रक्तस्त्रिनेत्रस्तरुणेंदुमौलिर्हारोज्ज्वलोहस्तिमुखोवःतान्त्रः वामो ३
र्ध्वकरमारभ्यवामाधःकरपर्यंतमायुधध्यानम् इतिध्यात्वाजपंकृत्वासमर्प्ययेत् इतिदशाक्षरःक्षिप्रप्रसादनमंत्रः॥

अथचतुरक्षरोहेरंबगणेशः ॐ हूँ नमः इतिप्राणायाममंत्रयं कृत्वा शिरसि ॐ गणकाय ऋषये नमः मुखे ॐ गायत्री छंदसे० हृद
ये ॐ श्री हेरंबाय देवतायै० इतिविन्यस्य गां गीमित्यादिना करषडंगन्यासं विधाय ध्यायेत् यथा मुक्ताविद्युत्पयोदामृतजपसृणा
निभैः पंचभिर्नागवक्त्रैर्हेरंबो भावनीयः शशधरमुकुटो दंतसिंहाधिरूढः हस्तैर्दिव्यत्रिशूलांकुशकजपवटीमुद्गराद्युक्तपालं
टंकांकं मोदकैस्याद्वदलसदभयेदानमक्षोघदीप्तिः अथस्यवामदक्षयोर्भराभये: तदुपरि मोदकरदौ तदुपरियोध्वकपाले तद
परि भक्षमालामुद्गरौ: तदुपरि अंकुशत्रिशूले इतिध्यात्वाजपंकृत्वा समर्पयेत् इतिहेरंबगणेशमंत्रः। अथसुब्रह्मण्यगणेश
मंत्र: ॐ ववन भवनेनमः इतिसप्ताक्षरमंत्रेण प्राणायाममंत्रयं कृत्वा शिरसि ॐ भग्नये ऋषये नमः मुखे गायत्री छंदसे० हृदि सुब्रह्मण्या
य देवतायै नमः इति विन्यस्य शंरीमित्यादिना करषडंगन्यासं विधाय ध्यानं कुर्यात् यथा पायाद्वो हस्तविग्रहः शशिमुखः सम्यग्दधा
नो भुजैः पद्मं भीतिहरं रिपुक्षयकरीं शक्तिं शुभं कुक्कुटम्। रक्तालेपनवस्त्रदामरुचिरो नानाविभूषान्वितः सुब्रह्मण्यगणाधिपः शुभकरो
भक्तौघविध्वंसकः।दक्षाधः करयोराद्येन तथोर्ध्वयोरन्ये द्वे स्यादुध्यानम् इतिध्यात्वा यथाशक्तिं जपं कृत्वा समर्पयेत् प्रणवान्तर
श्चेदयं मंत्रस्तदाः स्वर्णाक्षो भवति प्रणवादौ शक्तिबीजं चेदीयते तदायमष्टाक्षरो भवति एवं त्रिविधोयंमंत्रः इति सुब्रह्म
ण्यगणेशमंत्रः। अथश्रीमहागणपतिमंत्रः ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा इत्यष्टा

मं॰ दी
८

विंशत्यक्षरात्मकमंत्रेणाणाणायामत्रयंकृत्वा शिरसि ॐ गणकायऋषयेनमः मुखे ॐ निचृद्गायत्रीछंदसे॰ हृदये ॐ श्रीमहागणपतयेदेव
तायैनमः॰ गुह्ये गं बीजायनमः पादयोः ॐ शक्तयेनमः इतिविन्यस्य ममसर्वाभीष्टसिद्ध्यर्थे विनियोगः इति कृतांजलिः कृत्वा ॐ गां हृदयाय
नमः ॐ श्रीं गीं शिरसेस्वाहा ॐ ह्रीं गूं शिखायैवषट् ॐ क्लीं गैं कवचायहुं ॐ ग्लौं गौं नेत्रायफट् ॐ गंगः अस्त्रायफट् इति षडंगमंत्रानंगु
ष्ठादितलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वविन्यसेत् ततो ब्रह्मरंध्रे ॐ नमः दक्षश्रोत्रे श्रींनमः वामे ह्रीं दक्षनेत्रे क्लीं॰ वामे ग्लौं दक्ष
नासायां गं॰ वामनासायां गम् मुखेनम् दक्षबाहुमूलेयं मध्येतम् मणिबंधेयं॰ अंगुलिमूलेवं वामबाहुमूलेरं तन्मध्येवं मणि
बंधेरं अंगुलिमूलेदम् दक्षोरौसं दक्षजानुनिवं दक्षगुल्फेजम् दक्षपादांगुलिमूलेनम् वामोरौमे वामजानुनिवम् वामगुल्फे
शम् वामपादांगुलिमूलेमां अनाहतेनम् मणिपूरेयम् स्वाधिष्ठानेस्वाम् मूलाधारेहं शिरसि ॐ मुखे श्रीं हृदि ह्रीं गुह्ये क्लीं
पादयोः ग्लौं हृदये गं नमः इतिविन्यस्य गणपतयेइत्यादि द्वाविंशतिवर्णैर्मूर्द्धादि पादांतं व्यापकं कृत्वा मुखे श्रीं श्रीश्रीपतिभ्यां न
मः हृदि ह्रीं गौरीगौरीपतिभ्यां नमः गुह्ये ॐ क्लीं रतिकामाभ्यां नमः पादयोः ॐ ग्लौं महीवराभ्यां मुखे ॐ गं आमोदसिद्धिभ्यां हृदि राम:
ॐ गं प्रमोदसमृद्धिभ्यां गुह्ये ॐ गं सुमुखकांतिभ्यां पादयोः ॐ गं दुर्मुखमदनावतीभ्यां नमः हृदि गं विघ्नमद्रवाभ्यां जानुनि गम् ४
विघ्नकर्तृद्राविनिभ्यां नमः इतिविन्यस्य ध्यानं कुर्यात् यथा ॐ इक्षुवेजलधौ द्वीपेनवरत्नमये भूमौ तन्नारंगलसन्तोयैस्त्रैतशांतत

लेमले ततोयकुणसंपृक्तगंधवाहनिषेविते कल्पपादपसंशोभिभूभागसमलंकृते नानाकुसुमसंकीर्णेनानापक्षिविराजि
ते अनेकफलसंकीर्णेसेविते चाप्सरोगणैः उद्यद्बालातपोद्योतचंडज्योत्स्नासमाकुले विलसन्मणिगणोद्यत्कुट्टिमाहर्म्यभूतले
कल्पपादपपुष्पस्यस्वर्णपद्मस्वर्णमंडले पारिजातंकल्पतरुंतस्यमध्येविचिंतयेत् युगपदृतुषट्केनसेवितंपुष्पशोभितम्
नवरत्नमयंतस्याधस्तात्सिंहासनंस्मरेत् तन्मध्येलिपिपद्मंचषडारंतस्यमध्यतः कर्णिकायांत्रिकोणंचतन्मध्येचमहागणाम् ॥
नानारत्नविभूषाढ्यमेकदंतंगजाननं चक्राब्जत्रिशिखान्गुणेक्षुजधनूरत्नकोमलंसगदांव्रीह्ययान्वितवीजपूरकरदान्कुंभ
कैर्विभ्रतम् पद्मेनोत्पलकरयानिजप्रमदयाश्लिष्टंजपासंनिभंसार्द्धेंदुंप्रभजेमहागणपतिंत्रैचत्रपोद्भासितम् पुष्करोद्धृतर
त्नौघमयंकुंभमुखस्थितान् मणिमुक्ताप्रवालादीन्वर्षंतंधारयामुहुः सर्वतःसाधकस्याग्रेस्वदानजललोलुपाम् षट्पदा
लीकर्णतालैर्वारयंतंमुहुर्मुहुः भसराङ्कुरसंसेव्यंसदलमुकुटोज्वलम् उरुदंतंगजमुखंनानाभरणभूषितम् इतिध्यात्वागणपतिं
जयेत्सर्वोपचारकैः ऊर्ध्वपोत्रेचक्राब्जेतदधःशूलपाशौतदधोधनुरुत्पले तदधोगदाव्रीह्यग्रेतदधोबीजपूररदनौशुंडाग्रेरत्नकुंभ
इतिध्यात्वायथाशक्तिजपंविधायजपानंतरंकरषडंगन्यासंकृत्वाजपंदेवायसमर्प्यप्रणमेत् केचिद्गणपतयेइतिपदस्यच
तुर्थीविहायगणपतयेइतिसंपूर्णंतंपदंवदंतितदायंसप्तविंशत्यक्षरोमंत्रोभवति अत्रयथोपदेशंजपादिकंकार्यमिति

मं॰ चं॰
५

इतिमहागणपतिमंत्रः ॥ अथत्रैलोक्यमोहनमंत्रः वक्रतुंडैकदंष्ट्राय क्लींह्रींश्रींगंगणपतिवरवरदसर्वजनंमेवशमानयस्वा
हा इतित्रयस्त्रिंशदक्षरात्मकमंत्रेणप्राणायामत्रयंकृत्वा शिरसि ॐगणकायऋषयेनमः। मुखेगायत्रीछंदसे। हृदये ॐत्रै
लोक्यमोहनायगणपतयेदेवतायै इतिन्यासादिकंविन्यस्य ममाभिष्टसिद्ध्यर्थेविनियोगइतिकृतांजलिर्वदेत् ततःवक्रतुंडै
कदंष्ट्रायक्लींह्रींश्रींहृदयायनमः। गंगणपतिशिरसेस्वाहा वरवरदशिखायैवषट् सर्वजनकवचायहुंमेवशमानयनेत्राय
वौषट् स्वाहाअस्त्रायफट् इतिषडंगमंत्रान्गणपदितलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिविन्यस्यध्यानंकुर्यात् य
था ऐक्षवेजलधावित्यादिमहागणेशवत्इतिध्यात्वाजपंकृत्वासमर्प्यश्रीगुरुदेवंप्रणामेत् इतित्रैलोक्यमोहनगणे
शमंत्रः ॥ अथद्वादशाक्षरशक्तिगणेशः ॐह्रींगंह्रींमहागणपतयेस्वाहा इतिमंत्रेणप्राणायामत्रयंकृत्वाशिरसिग
णकायऋषयेनमः। मुखेविनिवृद्गायत्रीछंदसे। हृदयेश्रीशक्तिगणेशायदेवतायैनमः इतिविन्यस्यममसर्वाभीष्टसिद्ध
येविनियोगः इतिकृतांजलिरुक्त्वा ह्रींहृदयायनमः गंशिरसेस्वाहा ह्रींशिखायैवषट् महागणपतयेकवचायहुं राम:
स्वाहानेत्रायवौषट् समस्तमंत्रेणास्त्रायफडितिकरषडंगन्यासंविधायध्यानंकुर्यात् यथा मुक्ताचंडोघटीद्विंशशि ५
सकलधरंभालनेत्रंमनोज्ञंहस्ताभोजैर्दधानंसरशिरुहस्तणीरत्नपात्रंविशालम्। स्वीयक्रोडेस्थितायाध्वजनिहितलस

चारुपाणेः प्रियायाः योनौ विन्यस्तहस्तं मणिगणमुकुटं संभ्रयेनागवक्त्रम् ॥ दक्षाधःकरमारभ्य वामाधःकरपर्यन्तं स्मरति
मादिध्यानम् एवं ध्यात्वा यथाशक्ति जपं कृत्वा देवाय समर्प्पयेत् इति द्वादशाक्षरःशक्तिगणेश ॥ अथैकादशा
क्षरःशक्तिगणेशः ॐ ह्रीं गं ह्रीं वशमानय स्वाहा इति मंत्रेण प्राणायामत्रयं कृत्वा द्वादशाक्षरमंत्रोक्तान् ऋष्यादीन् विन्यस्य
ॐ हृदयाय नमः ह्रीं गं ह्रीं शिरसे स्वाहा वशं शिखायै वषट् आनय कवचाय हुं स्वाहा नेत्राय वौषट् समस्तमंत्रेण अस्त्राय फ
ट् इति षडंगमंत्रैर्निगदितैः कनेष्टांतं करयोर्विन्यस्य हृदयादिषडंगे ष्वपि न्यसेत् ध्यानम् यथा बंधूकाभंत्रिनेत्रं शशध
रमुकुटं भोगतोलं गणेशं नागास्यं धारयंतं गुणमृणि वरदा निक्षुदण्डं कराग्रैः पुंडासंस्थद्वियोषामदनरसमधुं प्रणामत्वां
ग्पातपायिप्रियस्त्रैलिंगेस्पृशंतं विहतकमलया भावयेद्देवदेवं ॥ वामोर्द्ध्वकरमारभ्य वामाधःकरपर्यन्तं आयुधध्यानं इति ध्यात्वा
जपं कृत्वा समर्पयेत् इत्येकादशाक्षरःशक्तिगणेशः ॥ अथ हरिद्रागणेशः ॐ हुं गं ग्लौं हरिद्रागणपतये वरवरद सर्व
वेजनहृदयं स्तंभय स्तंभय स्वाहा ॥ इति षड्विंशदक्षरमूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि मदनाय ऋषये नमः मुखे अनुष्टुप्छंद
से हृदये हरिद्रागणपतये देवतायै नमः इतिविन्यस्य मम सर्वाभीष्टसिद्ध्यर्थे विनियोग इति कृतांजलिरुक्त्वा गां मीत्यादिना ॥
ग्लौं ग्लीमित्यादिना वा करषडंगं विधाय ध्यायेत् यथा ॥ स्थाने पूर्व समीरिते मणिमये सिंहासने संस्थिते पीतं पीतविभूषणांब

मं. चं.
६

रत्नसन्माल्यादिसंशोभितं विघ्नं दंतिमुखं त्रिनेत्रलसितं हस्तैर्वहंतं भजे पाशंसन्मुरुण्डुंवरंसृणियुतंक्रोधाख्यमुद्राभये वामोर्ध्वा
दिकरत्रये आद्यात्रयं दक्षोर्ध्वादित्रयेन्यत्त्रयमित्याद्यध्यानम् । क्रोधमुद्रामुष्टिः । एवंसंचिंत्यजपंकृत्वासमर्पयेत् इति ह
रिद्रागणपतिमंत्रः । अथ वक्रतुण्डगणेशमंत्रः वक्रतुण्डायहुं इति षडक्षर मूलमंत्रेण प्राणायामत्रयंकृत्वा शिरसि भा
र्गवाय ऋषये नमः मुखे अनुष्टुप्छंदसे नमः हृदये वक्रतुण्डाय देवतायै नमः इति विन्यस्य वं हृदयाय नमः क्रं शिर
से स्वाहा तुं शिखायै वषट् डां कवचाय हुं यं नेत्राय वौषट् हुं अस्त्राय फट् इति षडंगमंत्रान् अंगुष्ठादितलांतं करयोर्विन्यस्य
षडंगेष्वपि विन्यस्य ध्यानं कुर्यात् यथो रम्योद्भिन्नारुणांतरमणिव्रातसंशोभिकांतिं संविभ्राणं करकिसलयैः पाशमथ्यं
कुशाग्रं । साभीतिं शंत्रिनयनयुतं रक्तमाल्यांशुभाद्यं भंभोजोद्यत्तुण्गतमनुं संस्मरेद्वक्रतुण्डं वामाद्यूर्ध्वयोराद्यतदाद्य
धस्थयोरन्ये इत्याद्यध्यानम् इति ध्यात्वा यथाशक्ति जपं विधाय समर्प्य प्रणमेत् । अत्र केचिद्दुंमिति दीर्घं वदंति अत्र य
थागुरूपदेशं जपादिकं कार्यं ॥ इति वक्रतुण्डगणेशः ॥ अथ द्वितीयः षडक्षरो वक्रतुण्डगणेशमंत्रः मेघोल्काय राम:
स्वाहा इति मूलमंत्रेण प्राणायामत्रयं कृत्वा शिरसि भार्गवाय ऋषये नमः मुखे अनुष्टुप्छंदसे नमः हृदये वक्रतुण्ग ६
यदेवतायै नमः इति विन्यस्य षड्भिर्मंत्रवर्णैः षडंगानि कुर्यात् ध्यानादिकं तु पूर्वोक्तमंत्रवदेव इति द्वितीयो वक्रतुंड

मंत्रः । अथाथर्वणिकोमंत्रोष्टात्रिंशदक्षरः एयस्योघस्यदृदितानिधिदोरलदोमनःरक्षोगणोवोवलगहनोवक्रतुण्डायहुं ऋषिध्याना
दिकंपूर्वोक्तषडक्षरवत् इत्याथर्वणिकोमंत्रः ॥ अथोच्छिष्टगणेशमंत्रः । हस्तिपिशाचिलिखेस्वाहा इतिनवाक्षरात्मकंमंत्रेणप्राणा
यामत्रयंकृत्वा शिरसिकंकोलायऋषयेनमः मुखेविराट्छंदसेनमः हृदयेउच्छिष्टगणपतयेदेवतायेनमः इतिविन्यस्यहस्तिहृ(
दयायनमः पिशाचिशिरसेस्वाहा लिखेशिखायैवषट् स्वाहाकवचायहुं समस्तेनास्त्रमाख्यातंपंचांगविधिरीरितः । ध्यानंतुपूर्वो
क्तवक्रतुंडषडक्षरमंत्रवत् । अथास्यैवमंत्रस्यभेदः ॐक्रोंक्लींह्रींरुंघेघेफट्स्वाहा इत्येकादशवर्णात्मकोमंत्रः अस्यतु(
ऋष्यादिकंपुराप्रोक्तंध्यानादिकंवक्रतुण्डषडक्षरमंत्रवत् एकदंष्ट्रायहस्तिमुखायलंबोदरायउच्छिष्टआत्मनेक्रोंह्रींक्लींह्रींघे
घेस्वाहा इत्येकोनत्रिंशद्वर्णात्मकोमंत्रः ऋष्यिध्यानादिवक्रतुण्डषडक्षरवत् । ॐनमोभगवतेएकदंष्ट्रायहस्तिमुखायलंबोद
रायउच्छिष्टायमहात्मनेक्रोंह्रींह्रींरुंघेघेस्वाहा ॥ अथाष्टत्रिंशद्वर्णात्मकोमंत्रः ऋष्यादिकंपुराप्रोक्तंषड्बीजैरंगमीरितं ध्यानं
तुपूर्वोक्तवक्रतुंडषडक्षरमंत्रवदेव षड्बीजैरिति क्रींहृदयंह्रींशिरःह्रींशिखाहुंकवचंघेनेत्रंघेअस्त्रं इत्युच्छिष्टग
णेशमंत्राश्चत्वारः इतिश्रीगोस्वामिजगन्निवासात्मजगोस्वामिजनार्दनविरचितायांमंत्रचंडिकायांप्रथमःप्रकाशः
इतिगणपतिमंत्रःप्रकरणम् अथशक्तिमंत्राः तत्रादौमातृकासरस्वती अकारादिक्षकारांतंएकपंचाशद्वर्णासंयुता

सं॰ चै
८
योमंत्रः तेनैव प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंदसे॰ हृदये श्रीमातृकासरस्वतीदेवतायै नमः गुह्ये ह
ल्भ्यो वीजेभ्यो नमः पादयोः स्वरेभ्यः शक्तिभ्यो नमः नाभौ व्यक्तये कीलकाय नमः मातृकान्यासे विनियोगः इति कृतांजलिरुक्त्वा
अं कं ५ आं हृदयाय नमः इं चं ५ ईं शिरसे स्वाहा उं टं ५ ऊं शिखायै वषट् एं तं ५ ऐं कवचाय हुं ओं पं ५ औं नेत्रत्रयाय वौषट् अं यं ९
अस्त्राय फडिति षडंगमंत्रानंगुष्ठादितलांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि न्यसेत् ॥ अथ ध्यानम् ॥ चंद्रार्द्धचिह्नशेखरां त्रिनय
नां पंचाशद्वर्णैः कृमाध्याप्तांगीं शरदिंदुकुंददलरुचिरां वक्षोजभारानताम् ॥ दानं चाक्षवरांकुशधारस्वलसत्कुंभयुग्मभृत्पलकं विधाराणां
करपंजकैर्भगवतीं पद्मासनस्थां स्मरेत् ॥ दक्षाधः करादिवामाधः करांतमायुधध्यानम् दानं वरं इति ध्यात्वा यथाशक्ति जपं कृत्वा
जपानंतरं करषडंगन्यासं कृत्वा जपं समर्प्य प्रणमेत् इति मातृकासरस्वती ॥ अथ वाग्वादिनीमंत्रः वद वद वाग्वादि
नि स्वाहा इति दशाक्षरमंत्रेण प्राणायामत्रयं कृत्वा॰ शिरसि कण्वाय ऋषये नमः मुखे विराट् छंदसे॰ हृदि श्रीसरस्वतीदेवता
यै॰ गुह्ये हल्भ्यो वीजेभ्यो नमः पादयोः स्वरेभ्यः शक्तिभ्यो नमः नाभौ व्यक्तये कीलकाय नमः इति विन्यस्य मम सर्वाभीष्ट रामः
सिद्ध्यर्थे विनियोगः इति कृतांजलिरुक्त्वा अं कं ५ आं हृदयाय नमः इति पूर्वोक्तमातृकोक्तषडंगं कृत्वा यद्वा ऐं वद ऋग्वेद ८
हृदयाय नमः ह्रीं वद यजुर्वेद शिरसे स्वाहा हूं वाक्सामवेद शिखायै वषट् ह्रैं वादिनि अथर्ववेद कवचाय हुं ह्रौं स्वाहा ष

ङंगनेत्रायवौषट् ऊः समस्तमंत्रपुच्छाय पुराणन्यायमीमांसाधर्मशास्त्रेतिहासकल्पगाथानाराशंसीभुस्त्राय फट् इतिषडंगमंत्रा
नेन्यासिनलांतकरयोर्विन्यस्य हृदयादिष्वपिविन्यस्य ध्यायेत् यथा ॐ हेतुहरूसितसरोजगृतेंदुमौलिः सद्देवनीकरसरोज
युगेन विद्याम्॥ संबिभ्रतीजव्रभरानमितांगमष्टिर्वाग्देवता भवतु नः सततं विभूत्यै॥ दक्षेलखनीवामपुस्तकं इतिध्यात्वा यथाशक्ति
जपं कृत्वा जपानंतरं करषडंगन्यासं कृत्वा जपं देव्यै समर्प्य प्रणामेत् इतिवाग्वादिनीमंत्रः॥ अथ हंसवागीश्वरीमंत्रः ॐ ह्रीं वागीश्वरी मन्त्र (सरस्वती)
ऐं ह्रीं ॐ सरस्वत्यै नमः इत्येकादशाक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि शक्तिऋषये नमः मुखे गायत्रीछंदसे हृदि हंस
वागीश्वर्यै देवतायै नमः इतिविन्यस्य सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिरुक्त्वा ऐं हृदयाय० ऐं शिरसे स्वाहा ऐं शि
खायै वषट् ऐं कवचाय हुं ऐं नेत्राय वौषट् ऐं अस्त्राय फट् इतिषडंगन्यासं विधाय ब्रह्मरंध्रे ॐ नमः भ्रूमध्ये ह्रीं दक्षनेत्रे ऐं
वामनेत्रे ह्रीं दक्षकर्णे ॐ वामकर्णे सं दक्षनासायां रं वामनासायां स्वं मुखे त्यै लिंगे न. पायौ मः इतिविन्यस्य ध्यानं कु
र्यात् यथा ध्यायेवाग्देवतां तामसमलकमलगां रम्यहंसाधिरूढां कर्पूरक्षोदकुंदद्युजहरहसितप्रोज्ज्वलद्देहकांतिम्। पीयू
षांश्वर्द्धमौलिं सकलशशिमुखीमंदहास्यामलास्याविद्यावीणासुधाढ्यत्कलशजपवटीहस्तपद्मैर्वहंतीम्॥ वामाधूर्ध्वयो
राधेतराधधःस्थयोरस्य इत्यायुधध्यानम् इतिध्यात्वा यथाशक्ति जपं कृत्वा जपानंतरं पुनः करषडंगन्यासं कृत्वा जपं दे

मं॰ वै ध्यैसमर्प्यप्रणमेत् ॥ इतिहंसवागीश्वरीमंत्रः ॥ अथद्वितीयाहंसवागीश्वरी ऐंनमोभगवतिवदवदवाग्देविस्वाहा इतिषोड
८ शवर्णात्मकमंत्रेणप्राणायामत्रयंकृत्वा पूर्वोक्तहंसवागीश्वरीवदृष्यादिकंविन्यस्य ऐंहृदयायनमः नमःशिरसेस्वाहा
भगवतिशिखायैवषट् वदवदकवचायहुं वाग्देविनेत्रायवौषट् स्वाहाअस्त्रायफडितिकरषडंगन्यासंविधायध्यायेत्
यथा कुंदेंदुभासुमितवसनाशुक्लमाल्यानुलेपाध्यात्वाविद्यामभृतकलशंवर्णमालांवहन्ती । हस्ताभोजैःसितकमलगाद्योतिचं
द्रमौलिर्मृन्येनोन्नुचितनयनाउन्नतापीनवक्षोजन्मा । दृक्षोर्ध्वकरमारभ्यदक्षाधःकरपर्यन्तमायुधध्यानम् आख्याआख्यानमु
द्राः इतिध्यात्वायथाशक्तिजपंकृत्वाजपंदेव्यैसमर्प्यप्रणमेत् इतिद्वितीयाहंसवागीश्वरी ॥ अथवाग्वादिन्यामंत्रद्वयम्
सरस्वतीविद्यावाणी ऐंवाचस्पतेअमृतेभुवःस्वः इतिएकादशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिशक्तिऋषयेनमः मुखेगायत्रीछंद
सेनमः हृदिश्रीवागीश्वर्यैदेवतायैनमः इतिऋष्यादिकंविन्यस्य ऐंहृदयायनमः वाचस्पतेशिरसेस्वाहा अमृतेशिखायै
वषट् भुवःकवचायहुं स्वःअस्त्रायफडितिविन्यस्य मूलेनकरयोर्व्यापकंकृत्वांगुष्ठादिकनिष्ठांतंपंचांगुलिषुहृदयाद्यस्त्रां एमः
तानिहृदयायनमः शिरसेस्वाहेत्यादिजातियुक्तानिनेत्रवर्जंविन्यस्य हृदयादिविपंचांगेष्वपिनेत्रवर्जंविन्यस्यध्यायेत् यथा ८
पद्मस्थांकमलयुगाक्षपुस्तकोद्यद्धस्ताग्रांशशिमुकुटांचभालनेत्राम् शुक्लाभांकुचविनतांमुनींद्रसेव्यांवाग्देवींभजतमु

धाः कवित्वदात्रीम् ॥ वामोर्ध्वादिवामाधःकरांतमायुधध्यान् इति ध्यात्वा यथाशक्तिजपं विधाय जपानंतरं पुनःकरांगन्यासं कृत्वा जपं
देव्यै समर्प्य प्रणमेत् — इति वाग्वादिन्यास्त्वेकोमंत्रः ॥ अथ द्वितीयोमंत्रः वां ह्रं स्वों इति त्र्यक्षरमंत्रेण प्राणायामत्रयं कृत्वा पूर्वोक्तवा
ग्वादिनी दशाक्षरमंत्रवद् ऋष्यादिकं विन्यस्य वां हृदयाय नमः ह्रं शिरः स्वों शिखा वां कवचं ह्रं नेत्रं स्वों अस्त्राय इति नमः स्वाहेत्यादि
जातियुक्तं हृदयादिषडंगेष्वपि विन्यस्य ध्यायेत् यथा मुक्ताहारलसत्तुशशिकलां संशोभि सच्छेखरां व्याख्यामक्षगुणं च रक्तक
लशं विधां वहंतीं करैः । पीनोत्तुंगकुचद्वयाग्रविनमन्मध्यान्वितां संस्थितां त्रैलोक्यप्रणतां सदा भवतु नो वाचामधीशाश्रिये ॥ दक्षोर्ध्वा
धःकरयोर्यथावामोर्ध्वाधःकरयोरप्येइत्यायुधध्यानम् इति ध्यात्वा जपं यथाशक्ति विधाय जपानंतरं करषडंगन्यासं विधाय जपं देव्यै
समर्प्य प्रणमेत् केचित्तु वाक्ह्रं स्वों एवं मंत्रं वदन्ति अन्ये तु वाकस्थाने वाग्बीजं वदंति तदत्र यथागुरूपदेशं जपादिकं कार्यमिति वा
ग्वादिन्यादिद्वितीयोमंत्रः ॥ अथ पारिजातसरस्वतीमंत्रः ॐ ह्रीं ऐं ह्रीं ॐ सरस्वत्यै नमः इत्येकादशाक्षरमंत्रेण प्राणायाम
त्रयं कृत्वा ऋषिध्यानजपादिकं पूर्वोक्तहंसवागीश्वरीवत्कुर्यात् । इति पारिजातसरस्वती ॥ अथ सप्तकोटीश्वरीमंत्रः
कः सः चंडिके सः कः इति सप्ताक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि ब्रह्मणे ऋषये मुखे गायत्री छंदसे हृदये सप्तकोटि
श्वरीदेवतायै नमः इति विन्यस्य चां चीमित्यादिना करषडंगन्यासं कृत्वा त्रिपुरावद्ध्यायेत् सात्वग्रे वक्ष्यते यथाशक्तिजपं विधा

मी. चं
९

जपानंतरं पुनः कार्षडंगादिकं कृत्वा जपं देव्यै समर्पयेत् प्राणायामेन इति सप्तकोटिश्वरीमंत्रः ॥ अथान्यो वाग्वादिनीमंत्रः ॐ वद वद
वाग्वादिनी ह्रीँ क्लीँ क्लिन्ने क्लेदिनि महाक्षोभं कुरु सौः मोक्षं कुरु ह्सौः ॐ इत्येकोनत्रिंशदक्षरात्मकमंत्रेण प्राणायामत्रयं कृत्वा पूर्वो
क्तवाग्वादिनीवत्सर्वमस्यापि कल्पयेत् प्रणवादिवाग्वादिन्यंत एकोनवाक्षरः मायादिकुर्वन्तस्त्रयोदशाक्षरोऽन्यः बालां
तिमादि प्रणवांतः सप्ताक्षरोऽपरः एवं मंत्रत्रयात्मको मंत्रः अस्य पृथक्प्रयोजनं तु शिवार्चनचंद्रिकायामुक्तं ॥ इति वा
ग्वादिनीमंत्रः ॥ एवं संभूय चत्वारो मंत्रा वाग्वादिन्याः । अथ बालामंत्रः ऐँ क्लीँ सौः इति त्र्यक्षरमंत्रेण प्राणायामत्रयं कृत्वा
शिरसि श्रीदक्षिणामूर्तये ऋषये नमः मुखे पंक्तिछंदसे नमः हृदि श्रीबालायै देवतायै नमः गुह्ये ऐं बीजाय पादयोः सौः
शक्तये नाभौ क्लीं कीलकाय नमः इति विन्यस्य मम चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोग इति कृतांजलिः कृत्वा ऐं हृद
याय नमः क्लीं शिरसे स्वाहा सौः शिखायै वषट् ऐं कवचाय हुं क्लीं नेत्राय वौषट् सौः अस्त्राय फडिति षडंगमंत्रान्गु
ष्ठादिकनिष्ठांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य ध्यानं कुर्यात् यथा भ्रमद्भ्रमरनीलाभधम्मिल्लामलपुष्पि राम:
णीम् । ब्रह्मरंध्रस्फुरद्दिव्यमुक्तालेखाविराजिताम् । मुक्तालेखाललाटस्थतिलकांचितमालिकाम् । विभुकमुक्ताहाराम् ९
धराभूषिताम् ग्रैवेयांगदपत्रालिस्फुरत्कांतिविराजिताम् । गंगातरंगकर्पूरपुंजाभांवाविराजिताम् । श्रीपत्ररुवंशश्रीसदृश

वारुवल्लीविराजिताम् । कंकणादिलसद्भूतामणिवंधलसत्प्रभाम् । प्रवाललतिकाकारपाणिपल्लवशोभिताम् । वज्रवैडुर्यमुक्तालीमे
खलांविमलप्रभाम् । रक्तोत्पलदलाकारपादपल्लवशोभिताम् । नक्षत्रमालासंकाशमुक्तामंजीरमंडिताम् । वामेनपाणिनैकेनपुस्तकं
चापरेणतु । अभयंचप्रयच्छंतीसाधकायवरानने । अक्षमालांचवरदंदक्षपाणिद्वयेनहि । दधतीचिंतयेद्देवींवश्यसौभाग्यवाक्प्र
दम् । क्षीरकुंदेंदुधवलांप्रसन्नांसंस्मरेत्प्रिये । दक्षवामोर्ध्वादिततधोन्तमायुधध्यानम् । इतिध्यात्वायथाशक्तिजपंकृत्वा
जपानंतरंपुनःकरषडंगंकृत्वापूर्वोक्तगुह्यातिगुह्येतिमंत्रेणजपंदेव्यैसमर्प्यगुरुंदेवतांचप्रणमेत् इतिबालामंत्रः ॥
अथभैरवीमंत्रः ह्स्रैं ह्स्क्लीं ह्स्रौः इतित्र्यक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिदक्षिणामूर्तिऋषयेनमः मुखेपंक्तिछंदसेन
मः हृदयेश्रीत्रिपुरभैरवीदेवतायैनमः इतिविन्यस्य ह्स्रां ह्स्रीमित्यादिनाकरषडंगन्यासंकृत्वा त्रिपुरांवध्यायेत् अथवा हृ
दयस्यारुणांभोजकर्णिकामध्यसंस्थिताम् । जपाकुसुमसंकाशामरुणांवरभूषणाम् । स्मितधौतमहामोहांत्रिनेत्रांचंद्रशेखराम् ॥
विश्वसौन्दर्यसर्वस्वजन्मसागररूपिणीम् ॥ ब्रह्माण्डनेत्ररुद्रेशशिवाख्यैर्मुंडसंज्ञकैः । मंडितांगीमहादेवींमुक्ताजपवटीधराम् । पुस्त
कालंकृतवरांवराभयधारिणीम् । आनंदमधुरांदेवींमदाघूर्णितलोचनाम् । रक्तांगरागकुसुमांध्यायेत्त्रिपुरभैरवीं । दक्षा
धूर्ध्वयोराधेतराधधःस्थयोरन्येइत्यायुधध्यानम् इतिध्यात्वायथाशक्तिजपंविधायजपानंतरंपुनःकरषडंगंन्यासंकृत्वा

देव्यै

मं. चं. जपंसमर्प्यप्रणमेत् अस्यैवमंत्रस्यान्येबहवोभेदाःसंति वाग्भवादिबीजेश्च पृथग्ध्यानादिकं चालितमत्र्वमस्माभिर्नितामहकृतायांशि
९ वार्चनचंडिकायांद्रष्टव्यं ग्रंथबाहुल्यभयादस्माभिस्तत्रनालेखि इतिभैरवीमंत्रः॥ अथवागीश्वरी ऐं ह्रीं क्लीं ह्रूं सः इति
पंचाक्षरेणप्राणायामत्रयंविधाय शिरसिमदनायऋषयेनमः मुखेगायत्रीछंदसे॰ हृदिवागीश्वरीदेवतायै॰ इतिविन्यस्य ऐं हृ
दयाय॰ ह्रीं शिरसेस्वाहा क्लीं शिखायैवषट् ह्रूं कवचायहुं सः नेत्रायवौषट् समस्तमंत्रेणास्त्रायफडितिषडंगमंत्रानंगुष्ठादि
कनिष्ठांतकरयोर्विन्यस्यध्यानंकुर्यात् यथा उद्यद्दिवाकराभासांनानालंकारभूषितां। बंधूककुसुमाकाररक्तवस्त्रांगणाग्रणीं॥
इक्षुकोदंडपुष्पेषुविराजितभुजद्वयाम्॥ इतिध्यात्वायथाशक्तिजपंविधायजपानंतरंपुनःकरषडंगंकृत्वाजपंदेव्यैसमर्प्यप्र
णमेत् इतिवागीश्वरीमंत्रः अथकामेश्वरीमंत्रः ह्रीं क्लीं ऐं ह्रूं स्त्रीं इतिपंचाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसि संमो
हनायऋषयेनमः मुखेगायत्रीछंदसेनमः हृदयेश्रीपंचकामेश्वरीदेवतायैनमः इतिविन्यस्य ह्रीं हृदयायनमः क्लीं शिरसे
स्वाहा ऐं शिखायैवषट् ह्रूं कवचायहुं स्त्रीं नेत्रायवौषट् समस्तमंत्रेणास्त्रायफडितिषडंगमंत्रानंगुष्ठादिकनिष्ठांतयोर्विन्य राम:
स्यहृदयादिषडंगेष्वपिविन्यस्यध्यायेत् यथा रक्तांबरांरक्तकुलांगनेपथ्यांरक्तभूषणाम्। पाशांकुशधनुर्बाणपुस्तकंचाक्षमा ९
लिकाम्। बिभ्रतीचंद्रधत्रींत्रैलोक्यवशकारिणीम्। पंचकामैःपरिवृतांध्यायेद्देवींविचक्षणः। वामाग्रपूर्द्वयोर्दयेतराधःस्थयोर

१ (क) सर्ववशंकरी

ये तदायधःस्थयोरितरे इत्याद्युधध्यानम् इति ध्यात्वा यथाशक्ति जपं विधाय जपानंतरं पुनः करषडंगन्यासं कृत्वा जपं देव्यै समर्प्य प्र
णमेत् इति पंचकामेश्वरीमंत्रः (क) अथ राजमातंगीमंत्रः ऐं ह्रीं श्रीं ॐ नमो भगवती मातंगेश्वरि सर्वजनमनोहरि सर्वमुखराजि सर्वमुख
रंजनि सर्वराजवशंकरि सर्वस्त्रीपुरुषवशंकरि सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि सर्वलोकममुकं मे वशमानय स्वाहा ॥ इत्यष्टाशीत्यक्षरमं
त्रेण प्राणायामत्रयं कृत्वा शिरसि ॐ दक्षिणामूर्तिऋषये नमः मुखे गायत्रीछंदसे नमः हृदये श्रीमातंगेश्वरीदेवतायै नमः इति वि
न्यस्य मम सर्वाभीष्टसिद्धये विनियोगः इति कृतांजलिः कृत्वा ऐं ह्रीं श्रीं ॐ नमो भगवति श्रीमातंगेश्वरि सर्वजनोहरि हृदयाय नमः
सर्वमुखराजि सर्वमुखरंजिनि शिरसे स्वाहा सर्वराजवशंकरि सर्वस्त्रीपुरुषवशंकरि शिखायै वषट् सर्वदुष्टमृगवशंकरि सर्वस
त्ववशंकरि कवचाय हुं सर्वलोकममुकं मे वशमानय नेत्रत्रयाय वौषट् स्वाहा अस्त्राय फट् इति षडंगमंत्राणांगुष्ठादिकरतलांतं करयो
र्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य ध्यानं कुर्यात् । अमृतोदधिमध्यस्थरत्नद्वीपे मनोरमे । स्वर्णप्राकारसंवीते मंडपे रत्ननिर्मिते ॥
कदंबबिल्वकल्हारे कल्पवृक्षोपशोभिते । वेदिमध्ये सुखासीनां रत्नसिंहासने शुभे ॥ अष्टपत्रं महापद्मे केशराढ्यं सकर्णिकम् ।
तन्मध्ये चत्रिकोणं स्यादष्टपत्रं ततो बहिः ॥ पुनः षोडशपत्रं स्यात्तद्बाह्ये स्याच्चतुर्दलम् । वेदास्त्रं सचतुर्द्वारं मंडलं प्रोक्तमराड
लम् ॥ तस्य मध्ये सुखासीनां श्यामवर्णां शुचिस्मिताम् । कदंबमाल्याभरणां पूजितां च सुरासुरैः ॥ प्रलंबालकसंयुक्तां चंद्ररेखा

मं॰ची
१०

वतंसिकाम् ललाटेतिलकोपेतामिषन्मृदुहसिताननाम् किंचित्स्वेदांबुमधुरललाटफलकोज्वलाम् वलीतरंगमध्यस्थरोमराजि
विराजिताम् सर्वाभरणसंयुक्तां मुक्ताहारविभूषिताम् नानामणिगणोन्नद्धकटिसूत्रैरलंकृताम् वलयैरत्नखचितैः केयूरैर्म
णिभूषितैः भूषितां दिव्यजांवालां मदाघूर्णितलोचनाम् आपीनमण्डलाभोगसमुन्नतपयोधराम् प्रलंबकर्णाभरणां कर्णोत्तं
सविराजिताम् तमालनीलानुकरणीमद्भुततामतंगिनीम् चतुःषष्टिकलारूपां पार्श्वस्थशुकसारिकाम् कोटिबालार्कसंका
शांजपाकुसुमसंनिभाम् एवंवापीतवर्णां वाध्यायेन्मातंगिनीपराम् इतिध्यात्वायथाशक्तिजपंविधायजपानंतरंपुनः कर
षडंगन्यासंकृत्वागुह्यातिगुह्येतिपूर्वोक्तमंत्रेणजपंदेव्यैसमर्प्यदेविंगुरुंचप्रणामेत् इतिराजमातंगीमंत्रः अथान्यो
राजमातंगीमंत्रः ऐं क्लीं सौः ऐं ह्रीं श्रीं ॐ नमोभगवतिमातंगेश्वरीसर्वजनमनोहरिसर्वमुखरंजनिक्लीं ह्रीं श्रींसर्वराजवशंक
रिसर्वदुष्टमृगवशंकरिसर्वसत्ववशंकरिसर्वलोकवशंकरिअमुकंमेवशमानयस्वाहा श्रीं ह्रीं ऐं सौः क्लीं ऐं इत्यष्टनवत्यक्ष
रात्मकमंत्रेणप्राणायामत्रयंकृत्वाशिरसिदक्षिणामूर्तयेनमः मुखेगायत्रीछंदसेनमः हृदिश्रीमातंगेश्वर्यैदेवतायैनमः रा॰म॰
इतिविन्यस्यममसर्वाभीष्टसिद्ध्यर्थेविनियोगः इतिकृतांजलिर्भूत्वा ऐं ह्रीं श्रींसर्वजनमनोहरिहृदयायनमः सर्वमुखरंज १०
निशिरसेस्वाहा क्लीं ह्रींसर्वराजवशंकरिशिखायैवषट् ३ सर्वस्त्रीपुरुषवशंकरिकवचायहुं ४ सर्वदुष्टमृगवशंकरिने

नेत्रत्रयाय वौषट् ३ सर्वसत्ववशंकरि अस्त्राय फडिति षडंगमंत्रानंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य ध्यानम्
कुर्यात् यद्वा: क्लीं क्लीमिति षड्दीर्घभाजा कामबीजेन षडंगं कृत्वा ध्यायेत् यथा अमृतमहोदधिमध्ये रत्नद्वीपे संकल्पवृक्षवने
मणिमयमंडपमध्ये मणिमयसिंहासनस्थां देवीं मातंगीं मधुपूरपानमुदितामाघूर्णमानेक्षणां स्मितविद्युद्वदनां कदंबकुसुमस्तो
म्यासितहरिणीकां वीणाशोभितकरां अरुणरक्तवसनामापक्वबिंबाधरां कस्तूरीतिलकां शशांकमुकुटां सह्रीरवपत्रभुतिं भापीनोन्न
तशोभुराजविनमन्मध्यां कश्यामलां ग्रैवेयांगदचारुहाररसनां मंजीरसंशोभिताम् भक्तौघं वाह्यस्य संमितदशासंतर्पयं
तीं मुदा ध्यायेत्साभ्रगतांतथाखिलकलारूपं शुभं भावये ॥ इति ध्यात्वा यथाशक्ति जपं विधाय जपानंतरं करषडंगन्यासं कृत्वा ज
पं देव्यै समर्प्य प्रणमेत् इति द्वितीयो राजमातंगीमंत्रः ॥ अथ तृतीयो राजमातंगीमंत्रः प्रागुक्ताष्टाशीत्यक्षरे राजमा
तंगिनि मंत्रे सर्वसत्ववशंकरीति पदानंतरं सौः राजलक्ष्मीप्रदे इति सप्ताक्षराणि संयोज्यानंतरं सर्वलोकममुकमित्यादि देवं पंच
नवत्यक्षरो मंत्रो भवति ऋष्यादिकं तु पूर्वोक्तमेव ज्ञेयम् ॐ हृदयाय नमः ऐं शिरसे स्वाहा इत्यादयः षडंगमंत्रा ज्ञेया
ध्यानं तु पूर्वोक्तराजमातंगिनीमंत्रवत् इति तृतीयो राजमातंगिनीमंत्रः ॥ अथ चतुर्थो राजमातंगीमंत्रः ॥ ॐ
नमो ब्रह्मश्री विराजिते राजपूजिते जये विजये गौरि गांधारि त्रिभुवनवशंकरि सर्वस्त्रीपुरुषवशंकरि सुसु दुदु घे घे वा वा ह्रीं

स्वाहा ॥ इति चतुःपंचाक्षरेण प्राणायामत्रयं कृत्वा शिरसि भगवान्ऋषये नमः मुखे निचृद्गायत्रीछंदसे नमः हृदि श्रीमातंगीदे
वतायै नमः इति ऋष्यादिकं विन्यस्य ह्रां हृदयाय नमः ह्रीं शिरसे स्वाहेत्यादिना करषडंगन्यासं विधाय पूर्वोक्तराजमातं
गीमंत्रवद्ध्यानं कुर्यात् यथाशक्ति जपं विधाय जपांते करषडंगादिकं कृत्वा जपं देव्यै समर्प्य प्रणमेत् इति चतुर्थो राजमातं
गीमंत्रः ॥ अथ पंचमो राजमातंगीमंत्रः तत्र पूर्वोक्तचतुःपंचाशदक्षरमंत्रस्य त्रिभुवनवशंकर्यै ते सर्वलोकवशंकरीति पदं
प्रोक्ता सर्वस्त्रीपुरुषेत्यादि स्वाहांतं वदेत् आदिस्थं प्रणवं ह्रीं कुर्यात् तेनैकाधिकषष्ट्यक्षरो मंत्रो भवति तेन मंत्रेण प्राणा
यामत्रयं कृत्वा शिरसि दक्षिणामूर्तिऋषये नमः मुखे निचृद्गायत्रीछंदसे नमः हृदि श्रीगौरीदेवतायै नमः इत्यृष्यादि ६
कं विन्यस्य ह्रीं नमो ब्रह्मश्रीराजिते राजपूजिते हृदयाय नमः जये विजये गौरि गांधारि शिरसे स्वाहा त्रिभुवनवशंकरि
शिखायै वषट् सर्वलोकवशंकरि कवचाय हुं सर्वस्त्रीपुरुषवशंकरि नेत्रत्रयाय वौषट् सुसु दुदु घेघे वावा ह्रीं स्वाहा अस्त्रा
य फडिति षडंगमंत्रानंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य ध्यानं कुर्यात् यथा सकल राम:
शशिराजन्मौलिराबद्धपाशांकुशरुचिरकराब्जा बंधुजीवारुणांगीम् । अमरनिकरवंद्या त्रीक्षणा शोणलेपांशुकजसु ११
मयुता स्यात्संपदे पार्वती नः ॥ इति ध्यात्वा यथाशक्ति जपादिकं विधाय जपानंतरं करषडंगं कृत्वा जपं देव्यै समर्प्य प्र

णामेत् इति पंचमो राजमातंगीमंत्रः ॥ अथ षष्ठो राजमातंगीमंत्रः "ॐ राजमुखी राजाधिमुखि वश्यमुखि ह्रीं श्रीं क्लीं दे
वदेवि महादेवि देवाधिदेवि सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा" इति सप्तचत्वारिंशदक्षरात्मकमंत्रेण प्राणायामत्रयं कृत्वा
शिरसि ॐ दक्षिणामूर्त्तये ऋषये नमः मुखे गायत्री छंदसे नमः हृदये श्रीमातंग्यै देवतायै नमः इति ऋष्यादिकं विन्यस्य
ॐ राजमुखि राजाधिमुखि हृदयाय नमः वश्यमुखि ह्रीं श्रीं क्लीं शिरसे स्वाहा देवदेवि शिखायै वषट् महादेवि कवचाय हुं देवा
धिदेवि नेत्रत्रयाय वौषट् सर्वजनस्य मुखं मम वशं कुरु कुरु स्वाहा अस्त्राय फट् इति षडंगमंत्रानंगुष्ठादिकरतलांतं करयोर्विन्यस्य
हृदयादिषडंगेष्वपि विन्यस्य पूर्वोक्ताष्टाशीत्यक्षरराजमातंगीवद्ध्यात्वा यथाशक्ति जपं विधाय जपानंतरं करषडंगन्यासं कृ
त्वा जपं देव्यै समर्प्य प्रणमेत् इति षष्ठो राजमातंगीमंत्रः ॥ अथ सप्तमो राजमातंगीमंत्रः "ॐ नमो हिलिश्चराड
मातंगिनि स्वाहा" इति पंचदशाक्षरमंत्रेण प्राणायामत्रयं कृत्वा ऋषिध्यानषडंगादिकं पूर्वोक्तराजमातंगीवत् इ
ति सप्तमः ॥ अथाष्टमो राजमातंगीमंत्रः "ऐं नमः श्रीमातंगि अमोघे सत्यवादिनि मम कर्णे अवतर २ सत्यं कथय
२ एह्येहि श्रीमातंग्यै नमः" इति चतुश्चत्वारिंशदक्षरात्मकमंत्रेण प्राणायामत्रयं कृत्वा ऋषिध्यानजपादिकं राजमा
तंगीवत्कुर्यात् इत्यष्टमः ॥ अथ नवमः "ऐं ह्रीं श्रीं ऐं क्लीं सौः क्लीं ह्रीं श्रीं मातंग्यै सर्वजनवशंकरि स्वाहा" इ

मी॰ची
१२

त्येकोनविंशत्यक्षरेणमंत्रेणप्राणायामत्रयंकृत्वाशिरसि मतंगवरवेनारदायऋषयेनमः मुखेनिहृगायत्रीछंदसेनमः हृ
दिश्रीमातंगेश्वरीदेवतायैनमः ममसर्वाभीष्टसिद्ध्यर्थेविनियोगः इतिकृतांजलिन्कानमःहृदयायनमः उच्छिष्टशिर
सेस्वाहा चंडालिशिखायैवषट् मातंगिकवचायहुं सर्ववशंकरिनेत्रायवौषट् स्वाहाअस्त्रायफडितिषडंगमंत्रा
णांगुष्ठादिकनिष्ठांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिन्यसेत् अथध्यानम् मातंगींनवयावकार्द्रचरणांप्रोद्भा
सिक्तस्वांङ्कांवीणांत्वासिकरांसमुन्नतकुचांमुक्ताप्रवालावलीम् हृद्यांगीस्मितशंखकुंडलधरांबिंबाधरांसन्नि
ताम्रांकीर्णालकवेणिमञ्जनयनांध्यायेत्कुकृष्णामलाम् ३ इतिध्यात्वायथाशक्तिजपंविधायषडंगंकृत्वाजपंसमर्प्य
प्रणामंकुर्यात् अ

१२ श्यामले
पुनरावृत्त

णमेत् इतिपंचमोराजमातंगीमंत्रः अथषष्टोराजमातंगीमंत्रः ॐराजमुखिराजाधिमुखिवश्यमुखिह्रींश्रींक्लींदेवदेविमहादेविदेवाधि
देविसर्वजनस्यमुखंममवशंकुरु२स्वाहा इतिसप्तचत्वारिंशदक्षरात्मकमंत्रेणप्राणायामत्रयंकृत्वाशिरसि ॐदक्षिणामूर्त्तिऋषयेन
मः मुखेगायत्रीछंदसेनमः हृदयेश्रीमातंगेश्वरीदेवतायेनमः इतिऋष्यादिकंविन्यस्य ॐराजमुखिराजाधिमुखिहृदयायनमः
वश्यमुखिह्रींश्रींक्लींशिरसेस्वाहा देवदेविशिखायैवषट् महादेविकवचायहुं देवाधिदेविनेत्रायवौषट् सर्वजनस्यमुखंममवशं
कुरु२स्वाहा अस्त्रायफट् इतिषडंगमंत्रान्नाद्यादिकान्‌तलांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिविन्यस्यपूर्वोक्तास्वाशीत्यक्ष
रराजमातंगीध्यात्वायथाशक्तिजपंविधायजपानंतरंकरषडंगन्यासंकृत्वाजपंदेव्यैसमर्प्यप्रणमेत् इतिषष्टोराजमातंगीमं
त्रः अथसप्तमोराजमातंगीमंत्रः ॐनमोहिलि२चाण्डमातंगिनिस्वाहा इतिपंचदशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा ऋ
षिध्यानषडंगादिकंपूर्वोक्तराजमातंगीवत् इतिसप्तमः अथाष्टमोराजमातंगीमंत्रः ऐंनमःश्रीमातंगीअमोघेस
त्यवादिनिममकर्णेअवतर२सत्यंकथय२एह्येहिश्रीमातंग्यैनमः इतिचतुश्चत्वारिंशदक्षरात्मकमंत्रेणप्राणायामत्रयंकृ
त्वाऋषिध्यानजपादिकंराजमातंगीवत्कुर्यात् इत्यष्टमः अथनवमः ऐंह्रींश्रींऐंक्लींह्रींश्रीमातंगेश्वरीसर्वजन
वशंकरिस्वाहा इतित्रयोविंशत्यक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिदक्षिणामूर्त्तिऋषयेनमः मुखेनिचृद्गायत्रीछंदसे॰

१३

मी. वी
१२

हृदयेश्रीमातंगेश्वरीदेवतायैनमः इतिविन्यस्यऐंहृदयायनमः क्लींशिरसेस्वाहा सौःशिखायैवषट् ऐंकवचायहुं क्लींनेत्रायवौष
ट् सौःअस्त्रायफडितिषडंगमंत्रानंगुष्टादिकनिष्टांतंकरयोर्विन्यस्यहृदयादिषडंगेष्वपिविन्यसेत् ध्यानंपूर्वोक्तमष्टनवत्यक्षर
मंत्रवत्कुर्यात् ततोयथाशक्तिजपंकृत्वाजपांतेषडंगादिकंविधायजपंदेव्यैसमर्प्यनमस्कारंकुर्यात् इतिनवमः । अथद
शमः "कामिनिरंजनिस्वाहा" इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिसंमोहनायऋषयेनमः मुखेनिचृद्गायत्रीछं
दसेनमः हृदिसर्वसंमोहिनीदेवतायैनमः इतिऋष्यादिकंविन्यस्यकामिनीहृदयायनमः रंजनिशिरसेस्वाहा स्वाहाशिखा
यैवषट् कामिनीकवचायहुं रंजनीनेत्रायवौषट् स्वाहाअस्त्रायफडितिषडंगमंत्रानंगुष्टादिकनिष्टांतंकरयोर्विन्यस्यहृदया
दिषडंगेष्वपिविन्यस्यध्यानंकुर्यात् यथा "श्यामांगीवल्लकींदोर्भ्यांवादयंतींसुभूषणां । चंद्रावतंसांविविधैर्गानैर्मोहयतींजगत् ॥"
इतिध्यात्वाजपंविधायषडंगंकृत्वाजपंदेव्यैसमर्प्यप्रणमेत् इतिदशमोमंत्रः ॥ अथैकादशोमंत्रः "नमःउच्छिष्ट
चांडालिमातंगीसर्ववशंकरिस्वाहा" इत्येकोनविंशत्यक्षरेणमंत्रेणप्राणायामत्रयंकृत्वाशिरसिमतंगुवेनारदायऋषय णमः
येनमः मुखेनिचृद्गायत्रीछंदसेनमः हृदिश्रीमातंगेश्वरीदेवतायैनमः ममसर्वाभीष्टसिद्धयेविनियोगः इतिकृत्वांजलि १२
हस्तानमः उच्छिष्टशिरसेस्वाहा चंडालिशिखायैवषट् मातंगीकवचायहुं सर्ववशंकरिनेत्रायवौषट् स्वाहाअस्त्रा

यफडिति षडंगमंत्रानंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य हृदयादिषडंगेष्वपिन्यसेत् अथध्यानम् मातंगीं नवयावकार्द्रचरणां श्रोणा
मितिरूढ्यां शुकां वीणोल्लासिकरश्यामया इतिध्यात्वायथाशक्तिजपंविधायषडंगंकृत्वाजपंसमर्प्यप्रणामंकुर्यात् अस्यैवमंत्रस्यभे
दानाह ॐ ह्रीं श्रीमित्यादिरेकः क्लीं ह्रीं श्रीमित्यादिरन्यः क्लीमित्यादिरपरः तेषुप्रथममंत्रस्यतुः शिरसिमतंगरवेनारदायऋष
येनमः इतरयोर्द्वयोर्मदनायऋषयेनमः षडंगध्यानादिकमन्यत्सर्वंपूर्वोक्तैकोनविंशत्यक्षरमंत्रवद्बोध्यम् इत्येकाद
शोराजमातंगीमंत्रः। अथद्वादशोमंत्रः ऐं क्लीं सौः नमः उच्छिष्टचंडालिमातंगिसर्ववशंकरिस्वाहा सौः क्लीं ऐं इति पंचविं
शत्यक्षरमंत्रेणप्राणायामत्रयंकृत्वाः शिरसिदक्षिणामूर्तयेऋषयेनमः मुखेनिवृद्गायत्रीछंदसेनमः हृदिश्रीमातंगेश्व
र्यैदेवतायैनमः इतिविन्यस्यममसर्वाभीष्टसिद्धयेविनियोगः इतिकृतांजलिरुक्त्वा ऐंनमः हृदयायनमः क्लीं उच्छिष्टशि
रसेस्वाहा सौः चंडालिशिखायैवषट् ऐं मातंगीकवचायहुं क्लीं सर्ववशंकरीनेत्रायवौषट् सौः स्वाहा अस्त्रायफट् इति
करषडंगंविधायध्यायेत् यथा। अंसेवेणीकुसुमनिचयांचूलिकांनीलचूडांमुक्ताभूषांपृथककचनतांवल्लकींवादयन्तीम्
माध्वीमत्तांमधुरवचनांश्यामलांकोमलांगीं तांसकलफलदांसंततंभावयामि इतिध्यात्वायथाशक्तिजपंविधायकरषडंगंकृ
त्वाजपंसमर्प्यप्रणमेत् इतिद्वादशोराजमातंगीमंत्रः। इतिगोस्वामिजगन्निवासतनयगोस्वामिजनार्दनविरचिता

भुवनेश्वरी

मं. चं १४ याम्मंत्रचंद्रिकायांद्वितीयःप्रकाशः २ । अथभुवनेश्वरीमंत्रः ह्रीँ इत्येकाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिशक्तिऋषयेनमः मु
१३ खेगायत्रीछंदसेनमः हृदिश्रीभुवनेश्वर्यैदेवतायैनमः गुह्येहंबीजायनमः पादयोईंशक्तयेनमः नाभौरंकीलकायनमः इति
विन्यस्यममचतुर्विधपुरुषार्थसिद्धयेविनियोगः इतिकृतांजलिरुक्त्वाह्रांह्रीमित्यादिनाकरषडंगन्यासंकृत्वाध्यायेत् उद्यद
दिनद्युतिरांशीतांशुकृतशेखराम् पद्मासनांत्रिनेत्रांचपाशांकुशवराभयैः अलंकृतचतुर्बाहुंमंदस्मितलसन्मुखीम् कुच
भारविनम्रांगलतांदेवींहृदिस्मरेत् । वामोर्द्धकरादिवामाधःकरांतमायुधध्यानम् इतिध्यात्वायथाशक्तिजपंविधायजपान्तेक
रषडंगंकृत्वाजपंदेव्यैसमर्प्यप्रणमेत् एत्येकोभुवनेश्वरीमंत्रः । अथद्वितीयः ऐँह्रीँश्रीँ इतित्र्यक्षरमंत्रेणप्राणाया
मत्रयंकृत्वापूर्वोक्तैकाक्षरवत्ऋष्यादिकंविन्यस्य ऐँह्रांहृदयायनमः ऐँह्रींशिरसेस्वाहेत्यादिनाकरषडंगन्यासंविधा
य ध्यानंकुर्यात् बंधूकाभांत्रिनयनयुतांशोतिचंद्रार्द्धमौलिं दोर्भ्यांपूर्णांविविधमणिभीरत्नपात्रंवहन्तीं पद्मंसौम्यामु
रुजचयुगांस्मेरवक्त्रेंदुबिंबांवामांध्यायेद्गुणस्तुतिवराभीतियुक्तांसदैव । इतिध्यात्वाजपंकृत्वाजपांतेकरषडंगंकृत्वाजपंसम रामः
र्प्यप्रणमेत् इतिद्वितीयोमंत्रः । अथतृतीयोमंत्रः ऐँह्रीँऐँ इतित्र्यक्षरमंत्रेणप्राणायामत्रयंकृत्वा एकाक्षरवत् १३
ऋष्यादिकंविन्यस्य ऐँह्रांऐँहृदयायनमः ऐँह्रींऐँशिरसेस्वाहा इत्यादिनाकरषडंगन्यासंविधायध्यानंकुर्यात् यथा॰

श्री पं. कृष्णप्रसाद [illegible] प्रथम [illegible]

भुवनेश्वरी

अंभोरुद्योतिमूर्तिंत्रिनयनलसितांपीनवक्षोजनम्रांहस्तांभोजैर्वहंतींवरदसरसिजेरत्नपात्राभयेच। नित्यांरक्तांबुजस्थांशिशिरकररत्न
मुकुटवरांहारभूषांविभ्राथीशार्चितांघ्रिंनिजहृदिकलयेभास्वरामंबिकांताम्। दक्षाधःक्रमारभ्यवामाधःकरपर्यंतमायुधध्यानम्
इतिध्यात्वाजपांतेकरषडंगंविधायजपंदेव्यैसमर्प्यप्रणामंकुर्यात् इतितृतीयोमंत्रः। अथचतुर्थोमंत्रः ऐं ह्रीं क्लीं इतित्र्यक्ष
रमंत्रेणप्राणायामत्रयंकृत्वाएकाक्षरवत्ऋष्यादिकंविन्यस्य ऐं ह्रीं मित्यादिनाकरषडंगन्यासंविधायध्यायेत् यथा अंकुशंवार
णाभयंकरैर्बिभ्रतीकमलसंस्थितांपरोद्यदर्कगणकांतिसन्ततंस्मरेचभुवनेश्वरीहृदि। दक्षोर्ध्वाधःकरयोराद्येवामकरयोरन्त्ये
इत्यायुधध्यानम् इतिध्यात्वाजपांतेऋष्यादिकंविधायजपंसमर्प्यप्रणमेत् इतिचतुर्थोमंत्रः। अथदुर्गामंत्रः ॐ ह्रीं दुर्गा
दुंदुर्गायैनमः इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिॐनारदायनमः मुखेगायत्रीछंदसेनमः हृदिश्रीदुर्गायैदेवतायैनमः
इतिविन्यस्यममसर्वाभिष्टसिद्धयेविनियोगः इतिकृतांजलिरुक्त्वाः ॐ ह्रीं दुर्गायै ह्रां हृदयायनमः ॐ ह्रीं दुंदुर्गायै ह्रीं शिरसेस्वा
हा ॐ ह्रीं दुंदुर्गायै ह्रूं शिखायैवषडित्यादिनाकरषडंगन्यासंकृत्वाध्यानंकुर्यात् यथा सिंहासनांमरकतद्युतिमिन्दुचूडांशंखं
चारिंकरतलैर्दधतींशरासंबाणान्त्रिनेत्रलसितांभवदुःखहंत्रीदुर्गांनमामिमणिभूषितभूषितांगीम्। वामाधऊर्ध्वक्रमेणायुधेतदाध
धःस्थयोरन्त्येइत्यायुधध्यानम् इतिध्यात्वायथाशक्तिजपंविधायजपांतेकरषडंगंकृत्वाजपंदेव्यैसमर्प्यप्रणमेत् ५

महिषमर्दिनी

मं॰चं॰ नि दुर्गामंत्रः । अथमहिषमर्दिनीमंत्रः महिषमर्दिनिस्वाहा इत्यष्टाक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिमार्कंडेयायऋषयेन
१४ मः मुखेगायत्रीछंदसेनमः हृदयेश्रीमहिषमर्दिन्यैदेवतायैनमः इतिविन्यस्यसर्वाभीष्टसिद्धयेविनियोगः इत्युक्त्वामहिषम
९५ र्दिनीहुंफट्हृदयायनमः महिषशत्रोशाधिहुंफट्शिरसेस्वाहा महिषंहंषयहंषयहुंफट्शिखायैवषट् महिषंहनहनदे
विहुंफट्कवचायहुं महिषमर्दिनिहुंफट्अस्त्रायफट् इतिपंचांगमंत्रान्मूलमंत्राभिमृष्टयोपाणयोरंगुष्ठादिकनिष्ठांता
स्वंगुलिषुविन्यस्यनेत्ररहितेषुहृदयादिपंचांगेषुचविन्यस्यध्यानंकुर्यात् यथा गारुडोपलसंनिभांमणिमौलिकुंडलमंडि
ताम् नौमिभालविलोचनांमहिषोत्तमांगनिषेदुषीं शंखचक्रकृपाणखेटकबाणकार्मुकशूलकान् तर्जनीमपिबिभ्रतीं
निजबाहुभिः शशिशेखरां दक्षाधूर्ध्वयोराद्येतदाधःस्थयोरन्येतदाधःस्थयोरपरेतदाधःस्थयोरितरे इत्यायुधध्यानं
इतिध्यात्वातर्जनींतर्जनीमुद्रामित्यर्थः सातुमतर्जन्ये काकिनीतुर्ध्वशीर्षासन्नमिताखधः मुद्रेयंतर्जनीप्रोक्ताततोयथाशक्तिजपंवि
धायजपांतेपंचांगंविन्यस्यजपंदेव्यैसमर्प्यप्रणमेत् इतिमहिषमर्दिनीदुर्गामंत्रः । अथजयदुर्गामंत्रः ॐदुर्गेदुर्गेरक्ष राम:
णिस्वाहा इतिदशाक्षरमंत्रेणप्राणायामत्रयंकृत्वाशिरसिनारदायऋषयेनमः मुखेविराट्छंदसेनमः हृदिश्रीजयदु १४
र्गायैदेवतायैनमः इतिऋष्यादिकंविन्यस्य ॐहृदयायनमः दुर्गेशिरसेस्वाहा दुर्गेशिखायैवषट् रक्षणिकवचायहुं ९५

स्वाहा नेत्राय वौषट् समस्तमंत्रेणास्त्राय फडिति षडंगमंत्राणांगुष्टादिकनिष्ठान्तं विन्यस्य हृदयादिष्वपि विन्यस्य ध्यानं कुर्यात्
यथा जलदद्युतिमिन्दुकिरीटां चक्रगदासिरुजः करपद्मैः दधतीं नयनत्रययुक्तां सिंहगतां प्रणमेज्जयदुर्गां हृकन्त्रिभूलंवामोर्द्ध्व
दिवामाधः क्रमात् नमायुधध्यानम् रक्षोर्द्धादितद्योन्नवा इति ध्यात्वा यथाशक्ति जपं विधायान्ते ऋष्यादिकं विन्यस्य जपं देव्यै
समर्प्य प्रणामेत् इति जयदुर्गामंत्रः ॥ अथ द्वितीयो जयदुर्गामंत्रः ॐ नमो दुर्गे रक्षणि स्वाहा इति द्वादशाक्षरेण प्राणा
यामत्रयं कृत्वा पूर्वमंत्रोक्तान् ऋष्यादीन् विन्यस्य विनियोगमुक्त्वा ॐ नमो हृदयाय नमः दुर्गे शिरसे स्वाहा दुर्गे शिखायै वषट्
रक्षणि कवचाय हुं स्वाहा नेत्राय वौषट् समस्तमंत्रेणास्त्राय फडिति षडंगमंत्रानंगुष्ठादिकनिष्ठांतं करयोर्विन्यस्य हृदयादि
ष्वपि विन्यस्य पूर्वोक्तदुर्गाशक्षरखध्यात्वा सिंहासनां मरकतद्युतिमित्यादि ततो जपं विधायान्ते ऋष्यादिकं विन्यस्य जपं स
मर्प्य प्रणामेत् इति द्वितीयो जयदुर्गामंत्रः ॥ अथ तृतीयः ॐ नमो भगवति ज्वालामालिनि गृध्रगणपरिवृते स्वाहा
इति द्वाविंशत्यक्षरमंत्रेण प्राणायामत्रयं कृत्वा शिरसि दीर्घतमसे ऋषये नमः मुखे ककुब्छंदसे नमः हृदि श्रीदुर्गायै
देवतायै नमः इत्यृष्यादिकं विन्यस्य ॐ नमो हृदयाय नमः भगवति शिरः ज्वालामालिनि शिखायै वषट् गृध्रगणपरिवृ
ते कवचं स्वाहा अस्त्रं इति पंचांगमंत्रानंगुलिषु करयोर्विन्यस्य नेत्रवर्जं हृदयादि पंचांगेष्वपि विन्यस्य नीलांभोधर

शूलिनीदुर्गा

मं. चं
१५

कांतिमित्यादिवत्स्वमाराणांशूलिनिदुर्गांध्यात्वाजपंकृत्वाऋष्यादिकंविन्यस्यजपंसमर्प्यप्रणामेत् इतितृतीयोजयदु
र्गामंत्रः अथशूलिनीदुर्गामंत्रः ज्वल२शूलिनिदुष्टग्रहहुंफट्स्वाहा इतिपंचदशाक्षरमंत्रेणप्राणायामत्रयंकृत्वा
शिरसिदीर्घतमसेऋषयेनमः मुखेअनुष्टुप्छंदसेनमः हुंबीजायनमः गुह्येस्वाहाशक्तयेनमःपादयोः हृदिश्रीशूलिनिदुर्गायैदेवता
यै इतिविन्यस्यविनियोगमुक्त्वा शूलिनिदुर्गेतिउग्रप्रज्ञितेनंदिनिरक्षर२महायोगेश्वरीहुंफट्हृदयायनमः शूलिनिवरदेदेवासिद्ध
पूजितेत्यादिशिरसेस्वाहा शूलिनिविंध्यवासिनिदेवसिद्धेत्यादिशिखा० शूलिन्यसुरमर्दिनिदेवासिद्धेत्यादिकवचं शूलिनिउग्रभ्रि
येचामयदेविसिद्धयेत्यादिअस्त्रायफट् इतिपंचांगमूलमंत्रात्स्थयोःपाणिपादतलादिकनिष्ठांतास्वंगुलिषुविन्यस्यहृदयादिषु
नेत्ररहितेषुपंचांगेषुचविन्यस्यध्यानंकुर्यात् यथा नीलांभोधरकांतिमिंदुमुकुटांसिंहाधिरूढांकरैः शूलंबाणमसिंस्वरिंदरग
दाबाणाशपाशान्भुजैः बिभ्राणामसिखेटकचतस्रभिःकन्याभिराराधितां नानाभूषणभूषितांत्रिणयनांदुर्गांभजेशूलि
निम् दक्षिणाधःकरमारभ्यवामाधःकरपर्यंतमायुधध्यानं इतिध्यात्वाजपंविधायांतेऋष्यादिकंविन्यस्यजपंदेव्यैसमर्प्य राम:
प्रणामेत् इतिशूलिनिदुर्गामंत्रः ॥ अथदुर्गानवमंत्रः उत्तिष्ठपुरुषिकिंस्वपिषिभयंमेसमुपस्थितंयदिशक्यमशक्यंवात १५
न्मेभगवतिशमयस्वाहा इतिमंत्रद्वात्रिंशदक्षरमंत्रेणप्राणायामत्रयंकृत्वा शिरसिआरण्यकायऋषयेनमः मुखेअनुष्टुप्छंदं

दुर्गामंत्र

दसेनमः श्रीं ह्रीं दिनवदुर्गायैनमः इतिविन्यस्यविनियोगमुक्त्वा उत्तिष्ठपुरुषिहृदयायनमः किंस्वपिषिशिरसेनमः भयंमे
समुपस्थितंशिखायैनमः यदिशक्यमशक्यंवाकवचायहुं तन्मेभगवतिनेत्रायवौषट् शमयस्वाहा अस्त्रायफट् इतिषडं
गमंत्रान्गुष्ठादिकरतलांतकरयोर्विन्यस्य हृदयादिषडंगेष्वपिविन्यस्यध्यानंकुर्यात् यथा विद्युद्दामप्रभाभांकनकसर
सिजेसंस्थितांसत्रिनेत्रांहस्ताम्भोजैर्वहंतीमरिदरवरदाभीतिसंज्ञांक्रमेण स्वर्णोद्यत्कांतिवस्त्रांशशिकलितलसडलचूडांप्र
